# Sayi JanmarkSha Ghantadhvanayah

# સાયિજન્મર્ક્ષઘણ્ટાધ્વનયઃ

## Document Information

Text title : Sayi JanmarkSha Ghantadhvanayah

File name : sAyijanmarkShaghaNTAdhvanayaH.itx

Category : deities_misc, vAsudevanElayath

Location : doc_deities_misc

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2023

*sanskritdocuments.org*

# સાયિજન્મર્ક્ષઘણ્ટાધ્વનયઃ

(શ્રીમતઃ એન્. કસ્તૂરિમહાશયસ્ય આઙ્ગ્લકવિતાયાઃ વિવર્તનમ્)

શ ृણુ પર્તિપુરીઘણ્ટા નદન્તિ મધુરસ્વરામ્ ।
પ્રતિધ્વનન્તિ ભૂપૃષ્ઠે સાગરે ન નભસ્તલે ॥ ૧॥

શિલોચ્ચાયાત્ ખમારોઢું સવિતા ત્વરતેતરામ્ ।
મા ભૂદ્વિલમ્બો દીપસ્ય ભગવત્સન્નિધાવિતિ ॥ ૨॥

વિલમ્બમાનાસ્તિષ્ઠન્તિ તારકા વ્યોમસીમસુ ।
સ્થાતવ્યં વીક્ષિતવ્યં ચેત્યૌત્સુક્યવિનિયન્ત્રિતાઃ ॥ ૩॥

આપાતતોઽપ્યાસ્વદિતું રઙ્ગમેતં મનોહરમ્ ।
આકેકરાક્ષિકલયા ચદ્રમા સમુદીક્ષતે ॥ ૪॥

મેઘાઃ પ્રતપ્તસૌવર્ણકૌશેયકવિભૂષિતાઃ ।
દ્યૌઃ પિઙ્ગનીલવર્ણાઢ્યચેલાઞ્ચિતકલેવરા ॥ ૫॥

પરિતોઽવસ્થિતાઃ શૈલકૂટાસ્તે શાન્તિબન્ધુરાઃ ।
સન્તૃપ્તા ભાન્તિ હરિતૈર્વસનૈર્ગૃહનિર્મિતૈઃ ॥ ૬॥

ઇતસ્તતશ્ચોત્પ્લવનક્રીડાનિર્વેશનિવૃતાઃ ।
આપ્રભાતાદ્યથાકામં વિચરન્ત્યજપોતકાઃ ॥ ૭॥

આહ્લાદભરિતઃ સર્વે દૃશ્યન્તે ચ મહીરુહાઃ ।
ભાન્તિ સઙ્ગીતમધુરાઃ શાખાઃ પત્રાવલી ભૃતાઃ ॥ ૮॥

પત્રિકા ચ તૃણસ્યેયમવરા ચ વરાકિકા ।
ધત્તે વજ્રમયં કર્ણભૂષણં દીપ્તિસુન્દરમ્ ॥ ૯॥

સ કપોતઃ પક્ષિજાતાવમિમાનૈકભાજનમ્ ।
યં વિશુદ્ધે વિભાતેઽસ્મિન્ વિમોચયતિ સ પ્રભુઃ ॥ ૧૦॥

કાકાશ્ચરન્તો વિપ્રાદ્વિટપં પ્લુતિશાલિનઃ ।

નિર્ભયા નિસ્ત્રપાશ્ચૈવ દિનેઽસ્મિન્ વિહરન્તિ હિ ॥ ૧૧॥

ઉદગ્રે પરમાનન્દે નિમગ્ના નિરુપદ્રવાઃ ।
અહો તે વિચરન્ત્યેવ કાકાગતિમયન્ત્રિતમ્ ॥ ૧૨॥

અસ્મિન્ પુણ્યદિને સર્વે વિશ્રામં મધુપાઃ ગતાઃ ।
પ્રભોર્વૈભાતિકસુમાનીતિ નોચુમ્બિતાનિ તૈઃ ॥ ૧૩॥

ઇયં કૃતજ્ઞતાપૂર્ણા સાયિગીતા મનસ્વિની ।
આરણ્યકે કુટગર્તે સ્વજનત્યાગદુખદે ॥ ૧૪॥

તયા લબ્ધં મહાભાગ્યં તત્પ્રસાદિદં કિલ ।
શ્રોતું ઘણ્ટાસ્વનં ચૈવં પ્રણન્તું પદયોઃ પ્રભોઃ ॥ ૧૫॥

તીર્થકે પાદાઘાતસમુત્સુકહૃદન્તરાઃ ।
પ્રકાશન્તે ચ સિકતા દીપ્તિસુસ્મિતસુન્દરાઃ ॥ ૧૬॥

પરિપાવનમન્યોન્યલયમીશ્વરમત્ર્યયોઃ ।
અનુભૂય જગત્પ્રાણમણ્ડલં સ્પન્દતેતરામ્ ॥ ૧૭॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતઃ સાયિજન્મર્ક્ષઘણ્ટાધ્વનયઃ સમ્પૂર્ણઃ ।

*Sayi JanmarkSha Ghantadhvanayah*

pdf was typeset on August 28, 2023

Please send corrections to *sanskrit@cheerful.com*